अर्ज्जकः, पुं, (अर्ज्जयति, अर्ज्ज+ण्वुल्।) श्वेतपर्णासः। वावुइ इति भाषा। तत्पर्य्यायः। श्वेतच्छदः २ गन्धपत्रः ३ माता ४ कुठेरकः ५। इति शब्द-चन्द्रिका॥ वर्व्वरीभेदः। आजवलाइ इति पश्चिमदेशे ख्यातः। तत्पर्य्यायः। सुगन्धतुलसी २ सुदपर्णः ३ मुखार्ज्जकः ४ उग्रगन्धः ५ जम्बीरः ६ कुठेरः ७ कठिञ्जरः ८। अस्य गुणाः। कटुत्वं। उष्णत्वं। कफवातामयनेत्ररोगनाशित्वं। रुचि-कारित्वं। सुखप्रसवकारकत्वञ्च। इति राजनि-र्घण्टः॥ सामान्यतुलसी। इति रत्नमाला॥ ("कफघ्ना लघवो रूक्षाः स्निग्धोष्णाः पित्तवर्द्धनाः। कटुपाकरसाश्चैव सुरसार्ज्जकभूस्तृणाः"॥ इति सुश्रुतश्च॥)

अर्ज्जकः, त्रि, (अर्ज्जयति, अर्ज्ज+ण्वुल्।) उपार्ज्जन-कर्त्ता। यथा। "अतएव वशिष्ठेन ज्येष्ठस्यांशद्वय-मभिधायार्ज्जकस्यांशद्वयमभिहितं"। इति दाय-भागः॥

अर्ज्जनं, क्ली, (अर्ज्ज+ल्युट्।) उपार्ज्जनं। स्वत्वहेतु-भूतो व्यापारः। यथा। अर्ज्जनं स्वत्वहेतुभूतो व्यापारः अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्ध-मिति दायभागः॥
("अर्जयितृव्यापारोऽर्जनमिति जीमूतवाहनः"। "स्वामित्वजनकव्यापारत्वम्" इति महेश्वरः"। "स्वामित्वहेतुभूतव्यापारत्वम् इति। श्रीकृष्णः। "पितृनिधनकालीनं वा जीवनमेव पुत्रस्यार्ज्जनं भविष्यति"। इति दायभागः।
"अर्थानामर्जने दुःखमर्जितानाञ्च रक्षणे"। इति पञ्चतन्त्रे।
"द्रव्यार्जनस्य नाशस्य मित्रामित्रस्य चार्जनम्"। इति मनुः।)

अर्जुनं, क्ली, (अर्ज+उनन्।) तृणं। नेत्ररोगः। इति विश्वमेदिन्यौ॥ तस्य लक्षणं। "एको यः शशरुधिरोपमस्तु विन्दुः शुक्लस्थो भवति तदर्जुनं वदन्ति"। इति माधवकरः॥
("नीरुक् श्लक्ष्णोऽर्जुनं विन्दुः शशलोहितलो-हितः" इति वाभटश्च।)

अर्जुनः, पुं, (अर्ज+उनन्।) पाण्डुराजस्य तृतीय-पुत्रः। स तु इन्द्रात् कुन्तीगर्भे जातः। तत्पर्य्यायः। फाल्गुनः २ जिष्णुः ३ किरीटी ४ श्वेतवाहनः ५ बीभत्सुः ६ विजयः ७ कृष्णः ८ सव्यसाची ९ धनञ्जयः १०। इति विराटपर्व्व। पार्थः ११ शक्रनन्दनः १२ गाण्डीवी १३ मध्यमपाण्डवः १४ श्वेतवाजी १५ कपिध्वजः १६ राधाभेदी १७ सुभद्रेशः १८ गुडाकेशः १९ वृहन्नलः २०। इति जटाधरः॥ ऐन्द्रिः २१। इति भूरिप्रयोगः॥ *॥ स्वनामख्यातवृक्षविशेषः। आजन इति भाषा। तत्पर्य्यायः। नदीसर्जः २ वीरतरुः ३ इन्द्रद्रुः ४ ककुभः ५। इत्यमरः॥ शम्बरः ६ पार्थः ७ चित्रयोधी ८ धनञ्जयः ९ वैरान्तकः १० किरीटी ११ गाण्डीवी १२ शिवमल्लकः १३ सव्यसाची १४ कर्णारिः १५ करवीरकः १६ कौन्तेयः १७ इन्द्र-सूनुः १८ वीरद्रुः १९ कृष्णसारथिः २० पृथाजः २१ फाल्गुनः २२ धन्वी २३। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"ककुभोऽर्जुननामाख्यो नदीसर्जश्च कीर्त्तितः।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥
ककुभः शीतलो भग्नक्षतक्षयविषास्रजित्।
मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत्"॥
इति भावप्रकाशः॥ अस्य गुणाः। क्षतभग्नरक्त-स्तम्भनमूत्रकृच्छ्ररोगे पथ्यत्वं। इति राजवल्लभः॥ कषायत्वं। उष्णत्वं। व्रणशोधनत्वं। कफादिश्रम-तृष्णार्त्तिनाशित्वं। वायुरोगप्रकोपकारित्वञ्च। इति राजनिर्घण्टः॥ *॥ (अस्य व्यवहारो यथा,—
"अर्ज्जुनस्य त्वचा सिद्धं क्षीरं दद्याद्धृदामये"॥
इति वैद्यकचक्रपाणिसंग्रहः॥)
कार्त्तवीर्य्यार्ज्जुनः। माहिष्मती नाम पुरी तस्य राजधान्यासीत्, स खलु भुजवीर्य्येण सप्तद्वीपां धरामजयत्। योगाद् बाहुसहस्रञ्च लब्धवान्।
"तस्य बाहुसहस्रन्तु युध्यतः किल भारत!।
योगात् योगेश्वरस्यैव प्रादुर्भवति मायया॥
तेनेयं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता।
ससमुद्रा सनगरा उग्रेण विधिना जिता॥
तेन सप्तसु द्वीपेषु सप्तयज्ञशतानि वै।
प्राप्तानि विधिना राज्ञा श्रूयन्ते जनमेजय"॥
"योऽर्ज्जुनेनार्ज्जनस्तुल्यो द्विबाहुर्बहुबाहुना"। इति महाभारते।) मयूरः। मातुरेकसुतः। इति मेदिनी॥ श्वेतवर्णः। तद्वति त्रि। इत्यमरः॥

अर्ज्जुनध्वजः, पुं, (अर्ज्जुनस्य पार्थस्य ध्वजः, रथ-केतुभूतः, सततं तत्रावस्थानात्।) हनूमान्। इति हेमचन्द्रः॥

अर्ज्जुनी, स्त्री, (अर्ज्ज+उनन्, गौरादित्वात् ङीष्।) गवी। करतोयानदी। कुट्टनी। उषा। इति विश्वमेदिन्यौ॥

अर्ज्जुनोपमः, पुं, (अर्ज्जुनः स्वनामख्यातः वृक्षः उपमा यस्य सः।) वृक्षभेदः। सेगुन इति भाषा। तत्पर्य्यायः। महापत्रः २ शाकवृक्षः ३ अनीलः ४ सर्णः ५। इति शब्दचन्द्रिका॥ शाकाख्यः ६ खरपत्रः ७। इति रत्नमाला॥

अर्णः, पुं, (अर्त्तेः नः।) शाकवृक्षः। इति शब्द-चन्द्रिका। अक्षरं। इत्यागमः॥ वर्णः। यथा,—
"वर्णोऽक्षरं रश्मिरर्णः स्वरास्तु कथिता अचः।
व्यञ्जनानि हलो वर्णाः कादयोऽर्णौ प्रकीर्त्तिताः"॥
इति वीजवर्णाभिधानं॥

अर्णः, [स्] क्ली, (ऋच्छति, ऋ गतौ उदके नुट् चेत्यर्त्तेरसुन् तस्य च नुट्।) जलं। इत्यमरः॥

अर्णवः, पुं, (अर्णांसि जलानि सन्त्यस्मिन्, अर्णसो-लोपश्चेति वः सलोपश्च।) समुद्रः। इत्यमरः॥
("अप्रधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः"।
इति रघुवंशे।)

अर्णवजः, पुं क्ली, (अर्णवात् जायते, अर्णव+जन+ ड,उपपदसमासः।) समुद्रफेनः। इति रत्नमाला॥ (समुद्रफेनशब्देऽस्य विवरणं ज्ञेयं॥)

अर्णवमन्दिरः, पुं, (अर्णवः मन्दिरमिव यस्य सः।) वरुणः। इति हेमचन्द्रः॥

अर्णवोद्भवः, पुं, (उद्भवत्यस्मात्, उत्+भू+अपा-दाने अप्, अर्णवः उद्भवो यस्य सः।) अग्निजार-वृक्षः। इति राजनिर्घण्टः॥ (अग्निजारशब्दे-ऽस्य गुणा ज्ञातव्याः॥) (चन्द्रः। अमृतं।)

अर्णोदः, पुं, (अर्णांसि ददाति, दा+क।) मुस्तकः। मेघः। इति राजनिर्घण्टः॥

अर्णोभवः, पुं, (अर्णसि जले भवति, अर्णस्+भू+ अप्, उपपदसमासः।) शङ्खः। इति राज-निर्घण्टः॥

अर्त्तगलः, पुं, (आर्त्तइव गलति, गल+अच्, पृषो-दरादित्वात् वा ह्रस्वः।) आर्त्तगलः। नील-झिण्टिका। इत्यमरटीकायां भरतः॥ (नीलझिण्टि-शब्देऽस्य गुणो ज्ञातव्यः॥)

अर्त्तनं, क्ली, (ऋत+ल्युट्, पक्षे इयङभावः।) जुगुप्सा। निन्दा। इत्यमरः॥

अर्त्तिः, स्त्री, (अर्द्द+क्तिन्।) पीड़ा। धनुरग्रभागः। इत्यमरः॥ (पीड़ार्थे उदाहरणं यथा,—
"चूर्णं समं रुचकहिङ्गुमहौषधानां,
शुण्ठ्याम्बुना कफसमीरणसम्भवासु।
हृत्पार्श्वपृष्ठजठरार्त्तिविसूचिकासु
पेयन्तथा यवरसेन च विड्विबन्धे॥"
इति वैद्यकचक्रपाणिसंग्रहः॥)

अर्त्तिका, स्त्री, (ऋत+ण्वुल्।) अत्तिका। नाट्योक्तौ ज्येष्ठा भगिनी। इत्यमरटीकायां स्वामी॥

अर्थ त् क ङ याचने। इति कविकल्पद्रुमः॥ ङ अर्थयते अर्थापयते। प्रार्थयत्यल्पमूल्यानीत्यादौ प्रार्थनं प्रार्थः पश्चात् प्रार्थं करोति इति णौ परस्मैपदं। इति दुर्गादासः॥

अर्थः, पुं, (अर्थ+घञ्।) विषयः। याच्ञा। धनं। कारणं। वस्तु। शब्दप्रतिपाद्यः। निवृत्तिः। प्रयोजनं। इति मेदिनी॥ प्रकारः। इति हेम-चन्द्रः॥ (धनार्थे यथा,—
"अर्थेन बलवान् सर्व्वः अर्थाद्भवति पण्डितः"।
इति हितोपदेशे। अयञ्च त्रिवर्गस्यान्तर्गतः।
"कस्यार्थधर्म्मौ वद पीड़यामि
सिन्धोस्तटावोघइव प्रवृद्धः।" इति कुमारसम्भवे।
"तमसो लक्षणं कामो रजसस्त्वर्थ उच्यते
सत्त्वस्य लक्षणं धर्म्मः श्रैष्ठ्यमेषां यथोत्तरं"॥
इति मनुः। शब्दप्रतिपाद्यः। शब्दानामभिधेयः।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये"।
इति रघुवंशे। अभिधेयं। अलङ्कारशास्त्रादौ अर्थस्त्रिविधः, वाच्यो लक्ष्यो व्यङ्ग्यश्चेति।

अर्थना, स्त्री, (अर्थ+युच्।) याच्ञा। भिक्षा। इत्यमरः॥

अर्थपतिः, पुं, (अर्थानां पतिः, षष्ठीतत्पुरुषः।) कुवेरः। राजा। इति मेदिनी॥
("अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः"।
"स नैषधस्यार्थपतेः सुतायाम्"। इति रघुवंशे।)

अर्थप्रयोगः, पुं, (अर्थानां धनानां प्रयोगः, षष्ठी-तत्पुरुषः।) वृद्धिजीविका। इत्यमरः॥ सुदे देया बाड़ी देया इत्यादि भाषा।